श्वासादिषु च रोगेषु प्रशस्तं तद्विशेषतः ।
छात्रं श्वित्रिक्रिमिहरं रक्तपित्तहरं गुरु ।
अर्घ्यं चक्षुष्यमायुष्यं कफपित्तामवातजित् ।
औद्दालकं कषायोष्णं कटुकुष्ठविषापहम् ।
दालं कफहरं रूक्षं दीपनं छर्द्दिमेहनुत् ।
उष्णमुष्णार्त्तमुष्णैश्च हन्यान्मधु विषान्वयात् ।
मधुनुष्णैर्विरुध्यन्ते यच्चैयित्वार्थ्यसंश्रितम् ।”
उष्णैः रौद्रैः करणैः उष्णं मधु उष्णार्त्तं रौद्रपीड़ितं जनं विषान्वयात् विषतुल्यत्वात् हन्यात् । * । नवपुराणमधुगुणाः ।
“बृंहणीयं मधु नवं वातश्लेष्महरं परम् ।
पुराणं लघु संग्राहि निर्द्दोषं स्थौल्यनाशनम् ।
दोषत्रयहरं पक्वमाममम्लं त्रिदोषकृत् ।”
अत्र केचिन्मधुनोऽग्निसंयोगाभावात् कालपक्वतामाहुः । * । मधुजातशर्करागुणाः ।
“मधुजा शर्करा रूक्षा तृष्णाच्छर्द्दातिसारजित् ।”
इति राजवल्लभे मधुवर्गः । * ।
अपि च ।
“माक्षिकं भ्रामरं क्षौद्रं पौत्तिकं छात्रकं तथा ।
आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः ।
नानापुष्परसाहाराः कपिला वनमक्षिकाः ।
याः स्थूलास्ताभिरुत्पन्नं मधु माक्षिकमुच्यते ।
ये स्निग्धाञ्जनगोलाभाः पुष्पासवपरायणाः ।
भ्रमरैर्जनितं तैस्तु भ्रामरं मधु भण्यते ।
पिङ्गला मक्षिकाः सूक्ष्माः क्षुद्रा इति हि विश्रुताः ।
ताभिरुत्पादितं यत्तु तत् क्षौद्रं मधु कथ्यते ।
महत्यो मक्षिकाः पिङ्गाः पुत्तिका इति कीर्त्तिताः ।
तज्जातं मधु धीमद्भिः पौत्तिकं समुदाहृतम् ।
छत्राकारन्तु पटलं वरचाः पीतपिङ्गलाः ।
ये कुर्व्वन्ति तदुत्पन्नं मधुच्छात्रकमीरितम् ।
मक्षिकास्तीक्ष्णतुण्डा याः पीताः षट्पदसन्निभाः ।
तदुद्भूतं यदर्घार्हं तदार्घ्यं मधु भण्यते ।
उद्दालाः कपिलाः कीटा भूमेरुद्दलगाः स्मृताः ।
वल्मीकान्तस्तदुत्पन्नमौद्दालकमुदीर्य्यते ।
इन्द्रनीलदलाकाराः सूक्ष्माश्चिन्वन्ति मक्षिकाः ।
यद्वृक्षकोटरान्तस्तन्मधु दालमिदं क्रमात् ।
इत्येतस्याष्टधा भेदैरुत्पत्तिः कथिता क्रमात् ।
अथ वक्ष्यामहं तेषां वर्णवीर्य्यादिकं क्रमात् ।”
तद्यथा,—
माक्षिकं तैलवर्णं स्यात् श्वेतं भ्रामरमुच्यते ।
क्षौद्रन्तु कपिलाभासं पौत्तिकं घृतसन्निभम् ।
आपीतवर्णं छत्रं स्यात् पिङ्गलञ्चार्घ्यनामकम् ।
औद्दालं स्वर्णसादृश्यमापीतं दालमुच्यते ।
माक्षिकं मधुरं रूक्षं लघु श्वासादिदोषनुत् ।
भ्रामरं पिच्छिलं रूक्षं मधुरं मुखजाड्यजित् ।
क्षौद्रन्तु शीतं चक्षुष्यं पिच्छिलं पित्तवातहृत् ।
पौत्तिकं मधु रूक्षोष्णं तम्यत्पित्तदाहहृत् ।
श्वित्रमेहकमिघ्नञ्च विद्याच्छात्रं गुणोत्तरम् ।
अर्घ्यं मध्वतिचक्षुष्यं कफपित्तादिदोषहृत् ।
औद्दालकन्तु कुष्ठादिदोषघ्नं सर्व्वसिद्धिदम् ।
दालं कटु कषायाम्लं मधुरं पित्तदायि च ।
नवं मधु भवेत् स्थौल्यं नातिश्लेष्महरं परम् ।
देहस्थौल्यापहं ग्राहि पुराणं मधु लेखनम् ।
पक्वं दोषत्रयघ्नं मधु विविधरुजाजाड्यजिह्वामयादिध्वंसं धत्ते च रुच्यं बलमतिषुतिदं वीर्य्यवृद्धिं विधत्ते ।
आमच्छेदामगुल्मामयपवनरुजापित्तदाहास्रदोषनाशं न्यूनं विशोषं जनयति नयति ध्वंसमप्यत्र दृष्टः ।
व्रणशोधनसन्धाने व्रणसंरोपणादिषु ।
साधारण्यान्मधु हितं तत्तुल्या मधुशर्कराः ।
उष्णं सदोष्णं काले वा स्वयमुष्णमथापि वा ।
आमं मधु मनुष्याणां विषवत्तापदायकम् ।
कीटकादियुतमम्लदूषितं
यच्च पर्य्युषितकं मधु स्रुतः ।
काष्ठकोटरगतञ्च मेचकं
तच्च गेहजनितञ्च दोषकृत् ।
इत्थं निहत्य यदुपात्तमपास्य दंशांस्ताहग्विधं मधु रसायनयोगयोग्यम् ।
हिक्कागुदाङ्कुरविशोषकफव्रणादिदोषापहं भवति दोषदमन्यथा चेत् ।
माध्वी सिता मधूत्पन्ना मधुजा मधुशर्करा ।
माक्षीकशर्करा चैषा क्षौद्रजा क्षौद्रशर्करा ।
यद्गुणं यन्मधु प्रोक्तं तद्गुणास्तस्य शर्कराः ।
विशेषाद्बलदृष्या च तर्पणं क्षीणदेहिनाम् ।”
इति राजनिर्घण्टः । * । * ।
मतान्तरे मधुगुणाः ।
“मधु शीतं लघु स्वादु रूक्षं ग्राहि विलेखनम् ।
चक्षुष्यं दीपनं स्वर्य्यं व्रणशोधनरोपणम् ।
सौकुमार्य्यकरं सूक्ष्मं परं स्रोतोविशोधनम् ।
कषायानुरसं ह्लादि प्रसादजनकं परम् ।
वर्ण्यं मेधाकरं वृष्यं विशदं रोचनं हरेत् ।
कुष्ठार्शःकासपित्तास्रकफमेहक्लमक्रिमीन् ।
मेदस्तृष्णावमिश्वासहिक्कातीसारविड्ग्रहान् ।
दाहक्षतक्षयांस्तत्तु योगवाह्यल्पवातलम् ।” * ।
अथ मधुभेदाः ।
“माक्षिकं भ्रामरं क्षौद्रं पौत्तिकं छात्रमित्यपि ।
आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः ।” * ।
अथ तेषां लक्षणानि गुणाश्च । तत्र माक्षिकस्य ।
“मक्षिकाः पिङ्गवर्णास्तु महत्यो मधुमक्षिकाः ।
ताभिः कृतं तैलवर्णं माक्षिकं तत् प्रचक्षते ।
माक्षिकं मधुषु श्रेष्ठं नेत्रामयहरं लघु ।
कामलार्शःक्षतश्वासकासक्षयविनाशनम् ।” * ।
अथ भ्रामरस्य ।
“किञ्चित् सूक्ष्मैः प्रसिद्धेभ्यः पुष्पेभ्यः अलिभिश्चितम् ।
निर्म्मलं स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतम् ।
भ्रामरं रक्तपित्तघ्नं मूत्रजाड्यकरं गुरु ।
स्वादुपाकमभिष्यन्दि विशेषात् पिच्छिलं हिमम् । * ।”
अथ क्षौद्रस्य ।
“मक्षिकाः कपिलाः सूक्ष्माः क्षुद्राख्यास्तत्कृतं मधु ।
मुनिभिः क्षौद्रमित्युक्तं तद्वर्णात् कपिलं भवेत् ।
गुणैर्माक्षिकवत् क्षौद्रं विशेषान्मेहनाशनम् ।”
अथ पौत्तिकस्य ।
“याः कृष्णा मशकोपमा लघुतराः प्रायो महापिच्छिलं
वृक्षाणां तरुकोटरान्तरगताः पुष्पासवं कुर्व्वते ।
तास्तज्ज्ञैरिह पुत्तिका निगदितास्ताभिः कृतं सर्पिषा
तुल्यं यन्मधु तद्वनेचरजनैः संकीर्त्तितं पौत्तिकम् ।
पौत्तिकं मधु रूक्षोष्णं पित्तदाहास्रवातकृत् ।
विदाहि मेहकृच्छ्रघ्नं ग्रन्थ्यादिक्षतशोषि च ।”
अथ छात्रस्य ।
“वरटाः कपिलाः पीताः प्रायो हिमवतो वने ।
कुर्व्वन्ति छत्रकाकारं तज्जं छात्रं मधु स्मृतम् ।
छात्रं कपिलपीतं स्यात् पिच्छिलं शीतलं गुरु ।
स्वादुपाकं क्रिमिश्वित्ररक्तपित्तप्रमेहजित् ।
भ्रमतृण्मोहविषहृत् तर्पणञ्च गुणाधिकम् ।”
अथार्घ्यस्य ।
“मधूकवृक्षा निर्य्यासं जरत्काम्याश्रमोद्भवाः ।
सवन्त्यार्घ्यं तदा ख्यातं श्वेतकं मालवे पुनः ।
तीक्ष्णतुण्डास्तु याः पीता मक्षिकाः षट्पदोपमाः ।
आर्घ्यास्तास्तत्कृतं यत्तदार्घ्यमित्यपरे जगुः ।
आर्घ्यं मध्वतिचक्षुष्यं कफपित्तहरं परम् ।
कषायं कटुकं पाके तिक्तञ्च बलपुष्टिकृत् ।” * ।
अथौद्दालकस्य ।
“प्रायो वल्मीकमध्यस्थाः कपिलाः स्वल्पकीटकाः ।
कुर्व्वन्ति कपिलं स्वल्पं तत् स्यादौद्दालकं मधु ।
औद्दालकं रुचिकरं स्वर्य्यं कुष्ठविषापहम् ।
कषायमुष्णमम्लञ्च कटुपाकञ्च पित्तकृत् ।” * ।
अथ दालस्य ।
“संस्रुत्य पतितं पुष्पात् यत्तु पत्रोपरि स्थितम् ।
मधुराम्लकषायञ्च तद्दालं मधु कीर्त्तितम् ।
दालं मधु लघु प्रोक्तं दीपनीयं कफापहम् ।
कषायानुरसं रूक्षं रुच्यं छर्द्दिप्रमेहजित् ।
अधिकं मधुरं स्निग्धं बृंहणं गुरुभारिकम् ।”
लघु पाके । गुरुभारिकं तुलितम् । * । अथ नवपुराणमधुगुणाः ।
“नवं मधु भवेत् पुष्टै नातिश्लेष्महरं सरम् ।
पुराणं ग्राहकं रूक्षं मेदोघ्नमतिलेखनम् ।
मधुनः शर्करायाश्च गुडस्यापि विशेषतः ।
एकसंवत्सरेऽतीते पुराणत्वं स्मृतं बुधैः ।”
अथ मधुनः शीतस्य गुणाधिक्यमुष्णताया निषेधः ।
“विषपुष्पादपि रसं सविषा भ्रमरादयः ।
गृहीत्वा मधु कुर्व्वन्ति तच्छीतं गुणवन्मधु ।